श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ त्रयोविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रयोविंशः सर्गः ॥

## ताराया विलापः

ततः समुपजिघ्रन्ती कपिराजस्य तन्मुखम्।
पतिं लोकश्रुता तारा मृतं वचनमब्रवीत्॥ **4.23.1** ॥

शेषे त्वं विषमे दुःखमकृत्वा वचनं मम।
उपलोपचिते वीर सुदुःखे वसुधातले॥ **4.23.2** ॥

मत्तः प्रियतरा नूनं वानरेन्द्र मही तव।
शेषे हि तां परिष्वज्य मां च न प्रतिभाषसे॥ **4.23.3** ॥

सुग्रीवस्य वशं प्राप्तो विधिरेष भवत्यहो।
सुग्रीव एव विक्रान्तो वीर साहसिकप्रिय॥ **4.23.4** ॥

ऋक्षवानरमुख्यास्त्वां बलिनं पर्युपासते।
तेषां विलपितं कृच्छ्रमङ्गदस्य च शोचतः॥ **4.23.5** ॥

मम चेमा गिरः श्रुत्वा किं त्वं न प्रतिबुध्यसे।
इदं तद् वीरशयनं तत्र शेषे हतो युधि॥ **4.23.6** ॥

शायिता निहता यत्र त्वयैव रिपवः पुरा।
विशुद्धसत्त्वाभिजन प्रिययुद्ध मम प्रिय॥ **4.23.7** ॥

मामनाथां विहायैकां गतस्त्वमसि मानद।
शूराय न प्रदातव्या कन्या खलु विपश्चिता ॥ **4.23.8** ॥

शूरभार्यां हतां पश्य सद्यो मां विधवां कृताम्।
अवभग्नश्च मे मानो भग्ना मे शाश्वती गतिः ॥ **4.23.9** ॥

अगाधे च निमग्नास्मि विपुले शोकसागरे।
अश्मसारमयं नूनमिदं मे हृदयं दृढम् ॥ **4.23.10** ॥

भर्तारं निहतं दृष्ट्वा यन्नाद्य शतधा कृतम्।
सुहृच्चैव च भर्ता च प्रकृत्या च मम प्रियः ॥ **4.23.11** ॥

प्रहारे च पराक्रान्तः शूरः पञ्चत्वमागतः।
पतिहीना तु या नारी कामं भवतु पुत्रिणी ॥ **4.23.12** ॥

धनधान्यसमृद्धापि विधवेत्युच्यते जनैः।
स्वगात्रप्रभवे वीर शेषे रुधिरमण्डले ॥ **4.23.13** ॥

कृमिरागपरिस्तोमे स्वकीये शयने यथा।
रेणुशोणितसंवीतं गात्रं तव समन्ततः ॥ **4.23.14** ॥

परिरब्धुं न शक्नोमि भुजाभ्यां प्लवगर्षभ।
कृतकृत्योऽद्य सुग्रीवो वैरेऽस्मिन्नतिदारुणे ॥ **4.23.15** ॥

यस्य रामविमुक्तेन हृतमेकेषुणा भयम्।
शरेण हृदि लग्नेन गात्रसंस्पर्शने तव ॥ **4.23.16** ॥

वार्यामि त्वां निरीक्षन्ती त्वयि पञ्चत्वमागते।
उद्बबर्ह शरं नीलस्तस्य गात्रगतं तदा ॥ **4.23.17** ॥

गिरिगह्वरसंलीनं दीप्तमाशीविषं यथा।
तस्य निष्कृष्यमाणस्य बाणस्यापि बभौ द्युतिः ॥ **4.23.18** ॥

अस्तमस्तकसंरुद्धरश्मेर्दिनकरादिव।
पेतुः क्षतजधारास्तु व्रणेभ्यस्तस्य सर्वशः॥ **4.23.19** ॥

ताम्रगैरिकसम्पृक्ता धारा इव धराधरात्।
अवकीर्णं विमार्जन्ती भर्तारं रणरेणुना॥ **4.23.20** ॥

अस्रैर्नयनजैः शूरं सिषेचास्त्रसमाहतम्।
रुधिरोक्षितसर्वाङ्गं दृष्ट्वा विनिहतं पतिम्॥ **4.23.21** ॥

उवाच तारा पिङ्गाक्षं पुत्रमङ्गदमङ्गना।
अवस्थां पश्चिमां पश्य पितुः पुत्र सुदारुणाम्॥ **4.23.22** ॥

सम्प्रसक्तस्य वैरस्य गतोऽन्तः पापकर्मणा।
बालसूर्योज्ज्वलतनुं प्रयातं यमसादनम्॥ **4.23.23** ॥

अभिवादय राजानं पितरं पुत्र मानदम्।
एवमुक्तः समुत्थाय जग्राह चरणौ पितुः॥ **4.23.24** ॥

भुजाभ्यां पीनवृत्ताभ्यामङ्गदोऽहमिति ब्रुवन्।
अभिवादयमानं त्वामङ्गदं त्वं यथा पुरा॥ **4.23.25** ॥

दीर्घायुर्भव पुत्रेति किमर्थं नाभिभाषसे।
अहं पुत्रसहाया त्वामुपासे गतचेतनम्।
सिंहेन पातितं सद्यो गौः सवत्सेव गोवृषम्॥ **4.23.26** ॥

इष्ट्वा सङ्ग्रामयज्ञेन रामप्रहरणाम्भसा।
तस्मिन्नवभृथे स्नातः कथं पत्न्या मया विना॥ **4.23.27** ॥

या दत्ता देवराजेन तव तुष्टेन संयुगे।
शातकौम्भीं प्रियां मालां तां ते पश्यामि नेह किम्॥ **4.23.28** ॥

राज्यश्रीर्न जहाति त्वां गतासुमपि मानद।
सूर्यस्यावर्तमानस्य शैलराजमिव प्रभा॥ **4.23.29** ॥

न मे वचः पथ्यमिदं त्वया कृतं
न चास्मि शक्ता हि निवारणे तव।
हता सपुत्रास्मि हतेन संयुगे
सह त्वया श्रीर्विजहाति मामपि॥ **4.23.30** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे त्रयोविंशः सर्गः॥